Udaka Śhānti Mantrāḥa

[KYV TB 2-7-7-3 to 2-7-7-9]

ॐ तेजोऽसि । तन्ते प्रयच्छामि । तेजस्वदस्तु मे मुखम् ।

ॐ tējō (a)si । tat'tēp' prayach'chhāmi ।
tējas'vadas'tu mē mukham'm ।

तेजस्वच्छिरो , अस्तु मे । तेजस्वान्-विश्वतः प्रत्यङ् ।

tējas'vach'chhirō , as'tu mē ।
tējas'vā-neviśh'vata[fp]' prat'yaṅ'ṅe ।

तेजसा संपिपृग्धि मा । ओजोऽसि । तन्ते प्रयच्छामि ॥१॥

tējasā sam'pipṛg'dhi mā ।
ōjō (a)si । tat'tēp' prayach'chhāmi ॥ 1 ॥

ओजस्वदस्तु मे मुखम् । ओजस्वच्छिरो , अस्तु मे ।

ōjas'vadas'tu mē mukham'm ।
ōjas'vach'chhirō , as'tu mē ।

ओजस्वान्-विश्वतः प्रत्यङ् । ओजसा संपिपृग्धि मा ।

ōjas'vā-neviśh'vata[fp]' prat'yaṅ'ṅe ।
ōjasā sam'pipṛg'dhi mā ।

पयोऽसि । तन्ते प्रयच्छामि । पयस्वदस्तु मे मुखम् ।

payō (a)si । tat'tēp' prayach'chhāmi ।
payas'vadas'tu mē mukham'm ।

www.saiveda.net

पयस्वच्छिरो , अस्तु मे । पयस्वान्-विश्वतः प्रत्यङ् ।
पयसा संपिपृग्धि मा ॥ २ ॥
payas'vach'chhirō , as'tu mē ।
payas'vā-neviśh'vata[fp]' prat'yaṅ'ṅe ।
payasā sam'pipṛg'dhi mā ॥ 2 ॥

आयुरसि । तत्ते प्रयच्छामि । आयुष्मदस्तु मे मुखम् ।
āyurasi । tat'tēp' prayach'chhāmi ।
āyuṣh'madas'tu mē mukham'm ।

आयुष्मच्छिरो , अस्तु मे । आयुष्मान्-विश्वतः प्रत्यङ् ।
āyuṣh'mach'chhirō , as'tu mē ।
āyuṣh'mā-neviśh'vata[fp]' prat'yaṅ'ṅe ।

आयुषा संपिपृग्धि मा । इममग्न , आयुषे वर्चसे कृधि ।
āyuṣhā sam'pipṛg'dhi mā ।
imamag'na , āyuṣhē var'chasē kṛdhi ।

प्रियꣳ रेतो वरुण सोम राजन् । मातेवास्मा , अदिते शर्म यच्छ ।
विश्वे देवा जरदष्टिर्यथा सत् ॥ ३ ॥
priyagm' rētō varuṇa sōma rājan'ne ।
mātēvās'mā , aditē śhar'ma yach'chha ।
viśh'vē dēvā jaradaṣh'ṭir'yathā sate ॥ 3 ॥

आयुरसि विश्वायुरसि । सर्वायुरसि सर्वमायुरसि ।
āyurasi viśh'vāyurasi । sar'vāyurasi sar'vamāyurasi ।

www.sanveda.net

यतो॒ वातो॒ मनो॑जवाः । यत॒ः क्षर॑न्ति॒ सिन्ध॑वः ।

yatō vātō manō॑javā-ḥa ।

ya॒taḥa , kṣharan’ti sin’dhavaḥa ।

तासां॑ त्वा॒ सर्वा॑साꣳ रु॒चा । अ॒भिषि॑ञ्चामि॒ वर्च॑सा ।

tāsāān’ tvā sar’vāsāgm’ ruchā ।

abhiṣhiñ’chāmi var’chasā ।

स॒मु॒द्र , इ॑वासि॒ गम्ह॑नां॑ ।सोम॑ , इवा॒स्यदा॑भ्यः ।

samud’ra , ivāsi gam’hanāā ।

sōma , ivās’yadāābh’yaḥa ।

अ॒ग्निरि॑व वि॒श्वतः॒ प्र॒त्यङ् । सूर्य॑ , इ॒व॒ ज्योति॑षा वि॒भूः ॥४॥

ag’niriva viśh’vata[fp]’ prat’yaṅ’ṅe ।

sūr’ya , ivaj’ jyōtiṣhā vibhū-ḥu ॥ 4 ॥

अ॒पां यो द्र॒वणे॒ रस॑ः । तम॒हम॒स्मा , आ॑मुष्याय॒णाय॑ ।

apāñ’ yōd’ dravaṇē rasaḥa ।

tamahamas’mā , āmuṣh’yāyaṇāya ।

तेज॑से ब्रम्हवर्च॑साय गृण्हामि । अ॒पां य , ऊर्मौ॑ रस॑ः ।

tējasēb’ bram’havar’chasāya gṛṇ’hāmi ।

apāñ’ ya , ūr’mau rasaḥa ।

तम॒हम॒स्मा , आ॑मुष्याय॒णाय॑ । ओज॑से वी॒र्या॑य गृण्हामि ।

tamahamas’mā , āmuṣh’yāyaṇāya ।

ōjasē vīr’yāya gṛṇ’hāmi ।

www.saiveda.net

अपां यो मध्यतो रसः । तमहमस्मा , आमुष्यायणाय ।
apāñ’ yō madh’yatō rasaḥa ।
tamahamas’mā , āmuṣh’yāyaṇāya ।

पुष्ट्यै प्रजननाय गृण्हामि । अपां यो यज्ञियो रसः ।
puṣh’ṭyaiīp’ prajananāya gṛṇ’hāmi ।
apāñ’ yō yaj’ñiyō rasaḥa ।

तमहमस्मा , आमुष्यायणाय । आयुषे दीर्घायुत्वाय गृण्हामि ॥५॥
tamahamas’mā , āmuṣh’yāyaṇāya ।
āyuṣhē dīr’ghāyut’vāya gṛṇ’hāmi ॥ 5 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.saiveda.net